७

सोमाहुतिर्भार्गवः।अग्निः । गायत्री

**श्रेष्ठं यविष्ठ भारताग्ने द्युमन्तमा भर।वसो पुरुस्पृहं रयिम्॥ २.००७.०१**

यविष्ठ- अभिनव। भारत- निर्वाहक। वसो- शरण्य। अग्ने- पावक सर्वभूतहितक्रतो। श्रेष्ठम्- उत्तमम्। द्युमन्तम्- दीप्तम्। पुरुस्पृहम्- बहुभिः स्पृहणीयम्। रयिम्- दानयोग्यधनम्। आ भर- आहर ॥१॥

**मा नो अरातिरीशत देवस्य मर्त्यस्य च।पर्षि तस्या उत द्विषः॥ २.००७.०२**

देवस्य- दिव्यस्य। मर्त्यस्य- मानुषस्य। च। अरातिः- शत्रुः। नः- अस्मान्। मा ईशत- मा आक्रमतु। उत- अपि च। तस्याः द्विषतः- तच्छत्रुतः। पर्षि- पालय ॥२॥

**विश्वा उत त्वया वयं धारा उदन्या इव।अति गाहेमहि द्विषः॥ २.००७.०३**

उत- अपि च। त्वया- भवदनुग्रहेण। वयम्। विश्वा द्विषः- सर्वा द्वेषभावनाः। धारा उदन्या इव- उदकधारा इव। अति गाहेमहि- तरेम ॥३॥

**शुचिः पावक वन्द्योऽग्ने बृहद्वि रोचसे।त्वं घृतेभिराहुतः॥ २.००७.०४**

पावक अग्ने। शुचिः- परिशुद्धः। वन्द्यः- स्तुत्यः सन्। बृहत्- महत्। वि रोचसे- प्रकाशसे। त्वम्। घृतेभिः- पूतनवनीतेन पूतचित्तेन। आहुतः- समन्तात् सिक्तो भवसि ॥४॥

**त्वं नो असि भारताग्ने वशाभिरुक्षभिः।अष्टापदीभिराहुतः॥ २.००७.०५**

भारत- धारक। अग्ने- पावक सर्वभूतहितक्रतो। त्वम्। नः- अस्माकम्। वशाभिः- काम्याभिः। अष्टापदीभिः-नानापदयुक्ताभिः। उक्षभिः- वाग्भिः। आहुतः- पूजितः। असि- भवसि ॥५॥

**द्र्वन्नः सर्पिरासुतिः प्रत्नो होता वरेण्यः।सहसस्पुत्रो अद्भुतः॥ २.००७.०६**

Dr.Rangan

WEBOLIM

सर्पिः- सरणशीलम्। द्र्वन्नः- रसहव्यम्। आसुतिः- आसिच्यते। प्रत्नः- पुराणः। होता- देवाह्वाता। वरेण्यः- श्रेष्ठः। सहसस्पुत्रः- शक्तिपुत्रः। अद्भुतः- असाधारणः॥६॥

Dr. Ranganji

WEBOLIM